यथा शिशुगन्धः। शिशूनां खेल्लाविशेषः। आखटि इति ख्यातः। इति केचित्। इति गङ्गाधरटीकायां भरतः॥

निर्व्वर्हणं, क्ली, (निर्+वर्ह+भावे ल्युट्।) निवर्हणम्। मारणम्। इत्यमरटीकायां नीलकण्ठः॥

निर्भटः, त्रि, (निर्+भट्+अच्।) दृढ़ः। इति त्रिकाण्डशेषः॥

निर्भयः, त्रि, (निर्गतं भयं यस्य यस्माद्वा।) भयरहितः। तत्पर्य्यायः। अजानेयः २। इति त्रिकाण्डशेषः॥ (यथा, हरिवंशे। ८३। ११।
"रजकः स तु तौ प्राह युवां कस्य वनेचरौ।
राज्ञो वासांसि यौ मौढ्याद्याचेते निर्भयावुभौ॥"
पुं, रौच्यमनुपुत्त्रे। यथा, हरिवंशे। ७। ८३।
"सुनेत्रः क्षत्रवृद्धिश्च सुतपा निर्भयो दृढः।
रौच्यस्यैते मनोः पुत्त्रा अन्तरे तु त्रयोदशे॥")

निर्भरं, क्ली, (निःशेषेण भरो भरणं यत्र।) अतिशयः। (यथा, गीतगोविन्दे। १। ४६।
"राधोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवामभ्यर्णे परिरभ्य निर्भरमुरः प्रेमान्धया राधया।
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुतिव्याजादुद्भटचुम्बितः स्मितमनोहारी हरिः पातु वः॥")
तद्वति, त्रि। इत्यमरः। ३। ४। २॥ (यथा, भागवते। ६। १८। २०।
"तं वीरमाहौशनसी प्रेमनिर्भरया गिरा॥")

निर्भर्त्सनं, क्ली, (नितरां भर्त्सनम्। निर्+भर्त्स+ल्युट्।) खलीकारः। अलक्तकम्। इति मेदिनी। ने, १८६॥ भर्त्सनञ्च॥ (यथा, महाभारते। ३। ३०४। ५।
"निर्भर्त्सनापवादैश्च तथैवाप्रियया गिरा।
ब्राह्मणस्य पृथा राजन्! न चकाराप्रियन्तदा॥")

निर्भर्त्सितं, त्रि, (निर्+भर्त्स+क्त।) कृतनिर्भर्त्सनः। तत्पर्य्यायः। निन्दितः २ धिक्कृतः ३ अपध्वस्तः ४। इति जटाधरः॥ (यथा, कुमारसम्भवे। ३। ५३।
"अशोकनिर्भर्त्सितपद्मरागम्॥")

निर्भाग्यः, त्रि, (निकृष्टं भाग्यं यस्य।) भाग्यरहितः। यथा, "मूढ़ाल्पापटुनिर्भाग्या मन्दाः स्युः।" इत्यमरः। ३। १। ४८॥

निर्म्मदः, पुं, (निर्गतो मदो दानवारि गर्व्वो वा यस्मात्।) कालवशान्निर्गलितमदहस्ती। तत्पर्य्यायः। उद्दान्तः २। इत्यमरः। २। ८। ३६॥ मदशून्ये, त्रि॥ (यथा, महाभारते। ३। ६६। ६६।
"ततः संवत्सरेऽतीते स्नातौजसमवस्थितम्।
निर्म्मदं दुःखितं दृष्ट्वा पितरो राममब्रुवन्॥")

निर्म्मध्या, स्त्री, (निर्गतं मध्यं यस्याः। शून्यमध्यत्वादेवास्यास्तथात्वम्।) नलिका। इति भावप्रकाशः॥ (नलिकाशब्देऽस्या विवृतिर्विशेषो ज्ञातव्यः॥)

निर्म्मन्थ्यदारु, क्ली, (निर्म्मन्थ्यं यज्ञार्थं घर्षणीयं दारु।) अरणिः। यज्ञे अग्न्युत्थापनार्थं घर्षणीयकाष्ठम्। इत्यमरः। २। ७। १६॥

निर्म्मलं, क्ली, (निर्गतं मलमस्मात्।) निर्म्माल्यम्। अभ्रकम्। त्रि, मलहीने। इति मेदिनी। ले, १०२॥ (यथा, महाभारते। ३। ६५। ४।
"निर्म्मलस्वादुसलिलं मनोहारि सुशीतलम्॥")
निष्पापे। यथा, मनुः। ८। ३१८।
"राजनिर्द्धूतदण्डास्तु कृत्वा पापानि मानवाः।
निर्म्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा॥"
यथा, देवीभागवते। १। १८। ३७।
"मनस्तु सुखदुःखानां महतां कारणं द्विज!।
जाते तु निर्म्मले ह्यस्मिन् सर्व्वं भवति निर्म्मलम्॥")

निर्म्मलोपलः, पुं, (निर्म्मलः विशुद्धः उपलः।) स्फटिकः। इति राजनिर्घण्टः॥

निर्म्माणं, क्ली, (निर्म्मीयते इति। निर्+मा+ल्युट्।) निर्म्मितिः। (यथा, भागवते। २। ५। ३२।
"यदैतेऽसङ्गता भावा भूतेन्द्रियमनोगुणाः।
यदायतननिर्म्माणे न शेकुर्ब्रह्मवित्तम!॥")
सारः। समञ्जसम्। इति मेदिनी। णे, ५८॥

निर्म्माल्यं, क्ली, (निर्+मल+ण्यत्।) देवोच्छिष्टद्रव्यम्। देवस्वत्वनिवृत्तिविशिष्टं देवदत्तं वस्तु। यथा,—
"अर्व्वाक् विसर्ज्जनाद्द्रव्यं नैवेद्यं सर्व्वमुच्यते।
विसर्ज्जिते जगन्नाथे निर्म्माल्यं भवति क्षणात्॥"
इति गरुड़पुराणम्॥*॥
तस्य स्थापनं चैतन्य(?) यथा। "ऐशान्यां मण्डलं कृत्वा निर्म्माल्यशेषं दद्यादिति। वैष्णवे तु ॐ विष्वक्सेनाय नमः। शक्तौ तु ॐशेषिकायै नमः। शिवे ॐचण्डेश्वराय नमः। सूर्य्ये ॐ तेजश्चण्डाय नमः। गणेशे ॐउच्छिष्टगणेशाय नमः। कालिकादौ ॐउच्छिष्टचाण्डालिन्यै नमः। तथा च विद्यानन्दनिबन्धे।
'सूर्य्ये गणपतावुग्रे शाक्ते शैवेऽथ वैष्णवे।
तेजश्चण्डमथोच्छिष्टमोजमुच्छिष्टपूर्व्विकाम्॥
चाण्डालीं शेषिकां चण्डं विष्वक्सेनं क्रमाद्यजेत्॥'
सोऽपो गणेशः।
'हृदये च बहिर्देवीं समर्प्य विधिवत्ततः।
निर्म्माल्यञ्च शुचौ देशे नैवेद्यं भक्षयेत् सुधीः॥'
तन्त्रान्तरे।
निर्म्माल्यं शिरसा धार्य्यं सर्व्वाङ्गे चानुलेपनम्।
नैवेद्यञ्चोपभुञ्जीत दत्त्वा तच्छक्तशालिने॥"
इति तन्त्रसारः॥*॥
"उदके तरुमूले वा निर्म्माल्यं तत्र संत्यजेत्॥"
इति कालिकापुराणे ५५ अध्यायः॥
निर्म्माल्यकालो यथा,—
"मणिमुक्तासुवर्णानां देवदत्तानि यानि च।
न निर्म्माल्यं द्वादशाब्दं ताम्रपात्रं तथैव च॥
पटी शाटी च षण्मासं नैवेद्यं दशमात्रतः।
मोदकं शङ्करस्यैव यामार्द्धेन महेश्वरि!॥
पट्टवस्त्रं त्रिमासञ्च यज्ञसूत्रमण्डः स्मृतम्
यावदन्नं भवेद्दुष्टं परमान्नन्तथैव च॥"
इत्येकादशीतत्त्वे योगिनीतन्त्रम्॥
शिवनिर्म्माल्ये विशेषो यथा, स्कान्दे।
"निर्म्माल्यं यो हि मे भक्त्या शिरसा धारयिष्यति।
अशुचिर्भिन्नमर्य्यादो नरः पापसमन्वितः।
नरके पच्यते घोरे तिर्य्यग्योनौ च जायते॥
ब्रह्महापि शुचिर्भूत्वा निर्म्माल्यं यस्तु धारयेत्।
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते!॥
शुचिः स्नानादिनेति शेषः। एवञ्च स्पृष्ट्वा रुद्रस्य निर्म्माल्यं सवासा आप्लुतः शुचिरिति कालिकापुराणं अशुचिविषयम्॥ अनुपनीतविषयमिति श्रीदत्तः। बहुचगृह्यपरिशिष्टम्।
अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम्।
शालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रताम्॥"
इति तिथितत्त्वम्॥
तस्य उत्तारणकालो यथा,—
अथ निर्म्माल्योत्तारणम्। अत्रिस्मृतौ।
"प्रातःकाले सदा कुर्य्यान्निर्म्माल्योत्तारणं बुधः।
लम्पिताः पशवो बद्धाः कन्यका च रजस्वला॥
देवता च सनिर्म्माल्या हन्ति पुण्यं पुराकृतम्॥
नारसिंहे श्रीयमोक्तौ।
देवमाल्यापनयनं देवागारे समूहनम्।
स्नापनं सर्व्वदेवानां गोप्रदानसमं स्मृतम्॥
नारदपञ्चरात्रे।
यः प्रातरुत्थाय विधाय नित्यं
निर्म्माल्यमीशस्य निराकरोति।
न तस्य दुःखं न दरिद्रता च
नाकालमृत्युर्न च रोगमात्रम्॥
अरुणोदयवेलायां निर्म्माल्यं शल्यतां व्रजेत्।
प्रातस्तु स्यान्महाशल्यं घटिकामात्रयोगतः॥
अतिशल्यं विजानीयात्ततो वज्रप्रहारवत्।
अरुणोदयवेलायां शल्यं तत् क्षमते हरिः॥
घटिकायामतिक्रान्तौ क्षुद्रं पातकमावहेत्।
मुहूर्त्ते समतिक्रान्ते पूर्णं पातकमुच्यते॥
अतिपातकमेव स्यात् घटिकानां चतुष्टये।
मुहूर्त्तत्रितये पूर्णे महापातकमुच्यते॥
ततः परं ब्रह्मवधो महापातकपञ्चकम्।
प्रहरे पूर्णतां याते प्रायश्चित्तं ततो न हि॥
निर्म्माल्यस्य विलम्बे तु प्रायश्चित्तमथोच्यते।
अतिक्रान्ते मुहूर्त्तार्द्धे सहस्रं जपमाचरेत्॥
पूर्णे मुहूर्त्ते सञ्जाते सहस्रं सार्द्धमुच्यते॥
सहस्रद्वितयं कुर्य्यात् घटिकानां चतुष्टये।
मुहूर्त्तत्रितयेऽतीते अयुतं जपमाचरेत्॥
प्रहरे पूर्णतां याते पुरश्चरणमुच्यते।
प्रहरे समतिक्रान्ते प्रायश्चित्तं न विद्यते॥"
इति श्रीहरिभक्तिविलासे ३ विलासः॥

निर्म्माल्या, स्त्री, (निर्म्मल्यते इति। निर्+मल्+ण्यत्। ततष्टाप्।) पृक्का। इति शब्दरत्नावली॥

निर्म्मितं, त्रि, (निर्+मा+क्तः।) कृतनिर्म्माणम्। गठितम्। रचितम्। यथा, सिद्धान्तमुक्तावल्याम्।